## षपूर्वहन्धृतराज्ञामणि । (१३५/११६०)

षकारपूर्वो यः [1]अन् [2]हनः धृतराज्ञश्च तस्य अकारलोपो भवति [3]अणि परतः । औक्ष्णः । ताक्ष्णः । [4]भ्रौणघ्नः । धार्तराज्ञः । षपूर्वहन्धृतराज्ञाम् इति किम् ? सामनः । [5]वैमनः । अन् इति प्रकृतिभावेन अल्लोपटिलोपौ उभावपि न भवतः । अणि इति किम् ? ताक्ष्ण्यः[6] ॥

## विभाषा ङिश्योः । (१३६/२३७)

[7]ङौ परतः शीशब्दे च[8] अनो विभाषा अकारलोपो भवति । राज्ञि, राजनि । [9]साम्नि, सामनि । साम्नी, सामनी ॥

## न संयोगाद्वमन्तात् । (१३७/३६८)

वकारमकारान्तात् संयोगादुत्तरस्य अनः अकारस्य लोपो न भवति । पर्वणा । पर्वणे । अथर्वणा । अथर्वणे[10] । संयोगात् इति किम् ? प्रतिदीव्ना । प्रतिदीव्ने । साम्ना । साम्ने । वमन्तात् इति किम् ? तक्ष्णा । तक्ष्णे ॥

## अचः । (१३८/४१६)

अचः इत्ययमञ्चतिर्लुप्तनकारो गृह्यते । तदन्तस्य भस्य अकारस्य लोपो भवति । दधीचः पश्य । दधीचा । दधीचे । मधूचः पश्य । मधूचा । मधूचे ॥

## उद ईत् । (१३९/४२०)

उदः उत्तरस्य अचः ईकारादेशो भवति । उदीचः[11] । उदीचा । उदीचे ॥

## आतो धातोः । (१४०/२४०)

आकारान्तस्य धातोः भस्य लोपो भवति । कीलालपः पश्य । कीलालपा । कीलालपे । शुभंयः पश्य । शुभंया । शुभंये । आतः इति किम्? [12]नियौ । निये । धातोः इति किम्? खट्वाः पश्य । मालाः पश्य । आतः इति योगविभागः, तेन क्त्वो [13]ल्यप् (७.१.३७/३३३२), हलः श्नः शानच् (३.१.८३/२५५७) इत्येवमादि सिद्धं भवति ॥

---

1. अन्शब्दः ह. 2. हन्शब्दस्य फ. ह. 3. अणि प्रत्यये ह. 4. वार्तघ्नः ब. क. फ. ह. ड. 5. वेमनः क. 6. तक्ष्णोऽपत्यम् इति सेनान्तलक्षणकारिभ्यश्च इति ण्यः इत्यधिकम् फ. ह. 7. ङौ शब्दे फ. ह. 8. परतः इत्यधिकम् फ. क. ह. 9. नाम्नि नामनि दाम्नि दामनि ह. 10. चर्मणा चर्मणे इत्यधिकम् ड. फ. ह, वर्मणा वर्मणे इत्यधिकम् क. इ. 11. पश्य इत्यधिकम् फ. ह. 12. नियः इत्यधिकम् फ. 13. यक् इ. ह.